# प्रथमस्तरीयः संस्कृत - सम्भाषण - वर्गः १२

पृष्ठं ८

# अधोलिखितानि पदानि ध्यानेन पठतु

## दकारान्तः एतद् शब्दः - पुंलिङ्गे

| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | एषः | एते |
| षष्ठी | एतस्य | एतेषाम् |

## दकारान्तः एतद् शब्दः - स्त्रीलिङ्गे

| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | एषा | एताः |
| षष्ठी | एतस्याः | एतासाम् |

## दकारान्तः एतद् शब्दः - नपुंसकलिङ्गे

| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | एतत् / एतद् | एतानि |
| षष्ठी | एतस्य | एतेषाम् |

# अधोलिखितानि पदानि ध्यानेन पठतु

## दकारान्तः तद् शब्दः - पुंलिङ्गे

| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | सः | ते |
| षष्ठी | तस्य | तेषाम् |

## दकारान्तः तद् शब्दः - स्त्रीलिङ्गे

| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | सा | ताः |
| षष्ठी | तस्याः | तासाम् |

## दकारान्तः तद् शब्दः - नपुंसकलिङ्गे

| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | तत् / तद् | तानि |
| षष्ठी | तस्य | तेषाम् |

# अधोलिखितानि पदानि ध्यानेन पठतु

## दकारान्तः अस्मद् शब्दः - त्रिषुलिङ्गेषु समानः

| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | अहम् | वयम् |
| षष्ठी | मम / मे | अस्माकम् / नः |

## दकारान्तः युष्मद् शब्दः - त्रिषुलिङ्गेषु समानः



| विभक्तिः | एकवचन | बहुवचन |
|---|---|---|
| प्रथमा | त्वम् | यूयम् |
| षष्ठी | तव / ते | युष्माकम् / वः |

# एतस्य / एतस्याः - तस्य / तस्याः नाम? (त्रिषुलिङ्गेषु)

## अधोलिखितानि पदानि ध्यानेन पठतु

| | | प्रथमा एकवचन्म् | षष्ठी एक वचनम् | प्रथमा बहुवचनम् | षष्ठी बहुवचनम् |
|---|---|---|---|---|---|
| एतद् | पूलिङे | एषः | एतस्य | एते | एतेषाम् |
| | स्त्रीलिङ्गे | एषा | एतस्याः | एता | एतासाम् |
| | नपुंसकलिङ्गे | एतत्/एतद् | एतस्य | एतानि | एतेषाम् |
| तद् | पूलिङे | सः | तस्य | ते | तेषाम् |
| | स्त्रीलिङ्गे | सा | तस्याः | ताः | तासाम् |
| | नपुंसकलिङ्गे | तत्/तद् | तस्य | तानि | तेषाम् |
| अस्मद् | त्रिषुलिङ्गेषु | अहम् | मम/मे | वयम् | अस्माकम्/नः |
| युष्मद् | त्रिषुलिङ्गेषु | त्वम् | तव/ते | यूयम् | युष्माकम्/वः |

# उदाहरणानि पठतु

| | | | |
|---|---|---|---|
| **एतद् शब्दः** | पुंलिङ्गे |  | एशः बालकः ।<br>एतस्य नाम मोहनः । |
| | स्त्रीलिङ्गे |  | एषा बालिका ।<br>एतस्याः नाम राधा । |
| | नपुंसकलिङ्गे |  | एतत् पुष्पम् ।<br>एतस्य नाम कमलम् । |
| **तद् शब्दः** | पुंलिङ्गे |  | सः अध्यापकः<br>तस्य नाम गिरिधरमहोदयः। |
| | स्त्रीलिङ्गे |  | सा अध्यापिका।<br>तस्याः नाम रोहिणी। |
| | नपुंसकलिङ्गे |  | तत् फलम् ।<br>तस्य नाम आम्रफलम्। |

# उदाहरणानि पठतु

| | | |
|---|---|---|
| युष्मद् शब्दः<br>त्रिषुलिङ्गेषु |  | त्वं विदूषकः।<br>तव नाम राघवः। |
| |  | त्वं नर्तकी।<br>तव नाम शाम्भवी। |
| |  | त्वं पुस्तकम्।<br>तव नाम रामायणम्। |
| अस्मद् शब्दः<br>त्रिषुलिङ्गेषु |  | अहम् अर्चकः।<br>मम नाम विजयेन्द्रः। |
| |  | अहं देवी ।<br>मम नाम सरस्वती। |
| |  | अहं पुष्पम्।<br>मम नाम चम्पकम्। |

# अभ्यासः

## उदाहरणानुगुणं रिक्तस्थानानि पूरयतु

| No | | No | |
|---|---|---|---|
| 1 | **एषः बालकः ।...एतस्य..... नाम मोहनः ।** | 10 | सः तन्त्रज्ञः ।............ कार्यालयः अत्र अस्ति। |
| 2 | एषः गायकः । ............ नाम कुमारगन्धर्वः । | 11 | सः रविः ।............ युतकं सुन्दरम् अस्ति । |
| 3 | **एषा बालिका ।...एतस्याः.. नाम मोहिनी ।** | 12 | सः सिंहः ।............ गर्जनं भयानकम् । |
| 4 | एषा गायिका ।............ नाम लता । | 13 | **सा युवती ।....तस्याः.... नाम गौरी ।** |
| 5 | **एतत नगरम् ।...एतस्य... नाम हरिद्वारम् ।** | 14 | सा गीता ।............. शाटिका सुन्दरी। |
| 6 | एतत् भवनम् ।............. नाम संस्कृतधाम । | 15 | सा नदी ।............. वेगः अधिकः । |
| 7 | **सः घनश्यामः ।....तस्य..... जनकः वसुदेवः ।** | 16 | सा लता ।............. पत्राणि कोमलानि । |
| 8 | सः श्यामः ।............ अग्रजः बलरामः । | 17 | सा बुद्धिमती ।........... साहाय्यं स्वीकरोतु । |
| 9 | सः शिक्षकः ।............ पुस्तकम् एतत् । | 18 | सा माता ।............. सहनशक्तिः अधिका । |



धन्यवादः